# Gomati Mahima

# गोमतीमहिमा

## Document Information

Text title : Gomati Mahima

File name : gomatImahimA.itx

Category : devii, aShTaka, nadI

Location : doc_devii

Author : Durgaprasad DvivedI

Transliterated by : Lalitha Mallikarjunan

Proofread by : Lalitha Mallikarjunan, Kamini Viswanathan

Latest update : December 10, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 6, 2021

*sanskritdocuments.org*

# गोमतीमहिमा

मातर्गोमति ! तावकीनपयसां पूरेषु मज्जन्ति ये
तेऽन्ते दिव्यविभूतिसूतिसुभगस्वर्लोकसीमान्तरे ।
वातान्दोलितसिद्धसिन्धुलहरीसम्पर्कसान्द्रीभवन्
मन्दारद्रुमपुष्पगन्धमधुरं प्रासादमध्यासते ॥ १॥

आस्तां कालकरालकल्मषभयाद् भीतेव कार्श्यं गता
मध्येपात्रमुदूढसैकतभराकीर्णाऽवशीर्णामृता ।
गङ्गा वा यमुना नितान्तविषमां काष्ठां समालम्बिता-
मातस्त्वं तु समाकृतिः खलु यथापूर्वं वरीवर्तसे ॥ २॥

या व्यालोलतरङ्गबाहु विकसन्मुग्धार विन्देक्षणं
भौ जङ्गीं गतिमातनोति परितः साध्वी परा राजते ।
पीयूषादपि माधुरीमधिकयन्त्यारादुदाराशया
साऽस्मत्पातकसातनाय भवतात्स्रोतस्वती गोमती ॥ ३॥

कुम्भाकारमुरीकरोषि कुहचित्काप्यर्धचान्द्राकृतिं
धत्से भूतलमानयष्टिघटनामालम्बसे कुत्रचित् ।
अन्तः क्वापि तडागवर्तनतया सिद्धाश्रमं सूयसे
मातर्गोमति ! यात भङ्गिविधया नानाकृतिर्जायसे ॥ ४॥

रोधोभङ्गिनिवेशनेन कुहचिद्वापीयसे पीयसे
क्वाप्युत्तालतटाधराम्बुकलया कूपायसे पूयसे ।
मातस्तीर समत्वतः क्वाचिदपां गतार्यसे त्रायसे
कुत्रापि प्रतनुस्पदेन सरितो नालीयसे गीयसे ॥ ५॥

तानासन्नतरानपि क्षितिरुहो याः पातयन्ति क्षणा-
त्तास्वर्थो घुणकीर्णवर्णघटनन्यायेन सङ्गच्छताम् ।
गोमन्ताचलदारिके ! तव तटे तूद्यल्लतापादपे
सद्यो निर्वृतिमेति भक्तजनता तामैहिकामुष्मिकीम् ॥ ६॥

एतत्तापनतापतप्तमुदकं माभूदितीवान्तिके
माद्यत्पल्लवतल्लजद्रुमतती यत्रातपत्रायते ।
मातः ! शारदचन्द्रमण्डलगलत्पीयूषपूरायिते
शय्योत्थायमजस्रमाह्निककृते त्वां बाढमभ्यर्थये ॥ ७॥

एकं चक्रमवाप्य तत्राभवतो दाक्षायणीवल्लभा-
द्देवो दैत्यविनाशकस्त्रिभुवने स्वास्थ्यं समारोपयत् ।
तच्चक्रं त्वयि भासतेऽपि बहुधा निश्चक्रम्महोपहा
यत्त्वं दीव्यसि तत्तवैष महिमा चित्रायते त्रायिनि ! ॥ ८॥

ये गोमतीस्तुतिमिमां मधुरां प्रभाते
सङ्कीर्तयेयुरुरुभक्तिरसाधिरूढाः ।
तेषां कृते सपदि सा शरदिन्दुकान्ति-
कीर्तिप्ररोहविभवान् विदधाति तुष्टा ॥ ९॥

इति श्रीदुर्गाप्रसादद्विवेदीविरचिता गोमती-महिमा समाप्ता ॥

Encoded by Lalitha Mallikarjunan

Proofread by Lalitha Mallikarjunan, Kamini Viswanathan

*Gomati Mahima*

pdf was typeset on February 6, 2021

Please send corrections to *sanskrit@cheerful.com*